'णौ पञ्चयति विस्तारे, व्यक्तौ तु शपि पञ्चते।' (श्लो. 18) इति देवः। पञ्चकः-पञ्चिका, पिपञ्चयिषकः-षिका, पञ्चकः-ञ्चिका, पिपञ्चिषकः-षिका, पापञ्चकः-ञ्चिका; इत्यादीनि सर्वाणि रूपाणि चौरादिकचम्पयतिवत् (499) ऊह्यानि। घञि-[A]प्रपञ्चः।

(960) "पट गतौ" (I-भ्वादिः-296. सक. सेट्. पर.)

'भाषार्थे पाटयेद् ग्रन्थे पटयेद् गमने पटेत्॥' (श्लो. 76) इति देवः। पाटकः-टिका, पाटकः-टिका, पिपटिषकः-षिका, पापटकः-टिका; इत्यादीनि सर्वाण्यपि रूपाणि कटतिवत् (148) बोध्यानि। [1]पाटूपटः, [2]परिपाटी, [3]पटुः, गोष्ठेपटुः, [4]पटिमा, [5]पटाका, [6]पटलम्, [7]पटोलः, पटलिका, पाटलम्, पाटली, [8]पटीरः, [9]पटनः, [10]पटितिः, [11]कपाटम्;

---

1. 'पाटेर्णिलुक् ऊक् चाभ्यासस्य' (वा. 6-1-12) इत्यनेन ण्यन्तात् पचाद्यचि णिलुक्, अभ्यासे हलादिशेषं बाधित्वा ऊक् च भवति।
   "माधवोऽभ्यासदीर्घोक्त्या 'पाटू रट' इतीच्छति।
   'पाटेर्णिलुक् दीर्घ ऊक् चे' त्यूचिवान् भोजराडपि॥"
   'तमः पटपटूपटम्', 'आटोपपाटूपटम्।' इति च प्रयोगः।' इति प्र. सर्वस्वे।
2. परिपटतीति परिपाटी। ताच्छील्ये णिनिः।
3. 'फलिपाटि—' (द. उ. 1-103) इत्युप्रत्ययो णिलुक् च। पाटयतीति पटुः = चतुरः। 'गोष्ठेपटुः' इत्यत्र पात्रेसमितादित्वात् (2-1-48) सप्तम्या अलुक्।
4. अतिशयेन पटुः पटिमा। पृथ्वादित्वात् (5-1-122) इमनिच् तद्धितः।
5. 'शलिपटि—' (द. उ. 3-33) इत्यादिना आकप्रत्ययः। पटाका = पक्षिजातिः।
6. 'वृषादिभ्यश्चित्' (द. उ. 8-109) इत्यादिना कलप्रत्ययः। पटलम् = घन-संघातः, अक्षिरोगश्च।
7. 'कपिगडिपटिभ्य ओलः' (द. उ. 8-105) इत्योलप्रत्ययः। पटोलः = द्रव्यजातिः।
8. औणादिके (द. उ. 8-72) ईरन्प्रत्यये रूपम्। पटीरम् = कार्मुकम्।
9. 'चलनशब्दार्थादकर्मकाद्—' (3-2-148) इत्यनेन तच्छीलादिषु कर्तृषु युच्प्रत्ययः।
10. 'तितुत्रेष्वग्रहादीनामिति वक्तव्यम्' (वा. 7-2-9) इत्यनेन इड् भवति।
11. कं = शिरं पाटयतीति कपाटम् = द्वारपिधानम्। ण्यन्तात् 'कर्मण्यण्' (3-2-1) इत्यण्। 'कवाटम्' इत्येव दाक्षिणात्यानां पाठ इति केचित्। तदानीं वटधातोरेतद्रूपमिति ज्ञेयम्।

A. 'कृष्णः प्रपञ्चरहितां धृततेजिताश्रैः वीरैः स्तुतां गिरमकीर्तदरातिवर्धी॥'
धा. का. 3.28.